সহাধ্যায়িশিষ্যেষ্বেকরাত্রেণেতি। কূর্ম্মপুরাণং। ত্রিরা
ত্রংশ্বশ্রূমরণেশ্বশুরেচৈতদেবহি। বৃহন্মনুঃ। মাতুলে
শ্বশুরেমিত্রেগুরৌগুর্ব্বঙ্গনাসুচ। অশৌচংপক্ষিণীং
রাত্রিংমৃতামাতামহীযদি।

৪১॥ কূর্ম্মপুরাণং। মতামহানাংমরণেত্রিরাত্রংস্যাদ
শৌচকং। শাতাতপঃ। পিত্রোরুপরমেস্ত্রীণামূঢ়ানান্তু
কথংভবেৎ। ত্রিরাত্রেণৈবশুদ্ধিঃস্যাদিত্যাহভগবান্
মনুঃ। ঋষ্যশৃঙ্গঃ। অপুত্রস্যতুযাপুত্রীসাপিপিণ্ডপ্রদা
ভবেৎ। তস্যাপিণ্ডান্দশৈতান্বাএকাহেনৈবনির্ব্বপেৎ
বিষ্ণুঃ। যাবদশৌচংতাবৎপিণ্ডংদদ্যাৎইত্যেতয়ো
রেকবাক্যতা। কূর্ম্মপুরাণং। ত্রিরাত্রমসপিণ্ডেষুস্বগৃ
হেসংস্থিতেষুচ। পৈঠীনসিঃ। অসম্বন্ধিনংদ্বিজং
দহিত্বাবহিত্বাসদ্যঃশৌচংসম্বন্ধেতুত্রিরাত্রং।

৪২॥ দেবীপুরাণং। পক্ষিমৎস্যমৃগৈর্যেতুশৃঙ্গিদংষ্ট্রিনখৈ
র্হতাঃ। পতনানশনপ্রায়ৈর্বজ্রাগ্নিবিষবন্ধনৈঃ। মৃতা
জলপ্রবেশেনতেবৈশস্ত্রহতাঃস্মৃতাঃ। ব্যাঘ্রঃ। শস্ত্র
ঘাতেত্র্যহাদূর্দ্ধংযদিকশ্চিৎপ্রমীয়তে। অশৌচংপ্রাক্
তংবিদ্যাচ্ছস্ত্রস্যবচনংযথা।

৪৩ ॥ ব্যাসঃ । ক্ষতেনম্রিয়তেযস্তুতস্যাশৌচং ভবেদ্দিবা
আসপ্তাহাত্রিরাত্রং স্যাদ্দশরাত্রমতঃপরং ।

৪৪ ॥ বৃহস্পতিঃ । ডিম্বাহবেবিদ্যুতাচরাজ্ঞাগোবিপ্রপালনে
সদ্যঃশৌচং মৃতস্যাহুস্ত্র্যহঞ্চান্যেমহর্ষয়ঃ ।

৪৫ ॥ কূর্ম্মপুরাণং । অথকশ্চিৎ প্রমাদেনম্রিয়তেগ্নিবিষা
দিভিঃ । তস্যাশৌচংবিধাতব্যংকার্য্যঞ্চাপ্যুদকাদিকং ।

৪৬ ॥ কৌর্ম্মে । সদ্যঃশৌচং সমাখ্যাতং দুর্ভিক্ষেচাপ্যু
পদ্রবে ।

৪৭ ॥ ব্রহ্মপুরাণং । শৃঙ্গিদংষ্ট্রিনখিব্যালবিষবহ্নিস্ত্রিয়াজলৈঃ ।
আদরাৎ পরিহর্ত্তব্যঃকুর্ব্বন্ক্রীড়াং মৃতস্তুযঃ ।

৪৮ ॥ নিগৃহীতঃস্বয়ং রাজ্ঞাচৌর্য্যাদোষেণকুত্রচিৎ । পর
দারানুযন্তশ্চদ্বেষাৎ তৎপতিভির্হতাঃ ।

৪৯ ॥ অসমানৈশ্চসঙ্কীর্ণৈশ্চাণ্ডালাদ্যৈশ্চবিগ্রহং । কৃত্বা
তৈর্নিহতাস্তাং স্তচ্চাণ্ডালাদীন্‌সমাশ্রিতাঃ ।

৫০ ॥ গরাগ্নিবিষদাশ্চৈবপাষণ্ডাঃক্রূরবুদ্ধয়ঃ । ক্রোধাৎ প্রা
য়ংবিষংবহ্নিংশস্ত্রমুদ্বন্ধনংজলং । গিরিবৃক্ষপ্রপাতঞ্চয়ে
কুর্ব্বন্তিনরাধমাঃ । কুশিল্পজীবিনশ্চৈবসূনালঙ্কারকা
রিণঃ । তথা । ব্রহ্মদণ্ডহতাযেচযেচবৈব্রাহ্মণৈর্হতাঃ

মহাপাতকিনোযেচপতিতাস্তেপ্রকীর্ত্তিতাঃ। পতিতা
নাঞ্চদাহঃস্যাৎনান্ত্যেষ্টির্নাস্থিসঞ্চয়ঃ। নচাশ্রুপাতঃ
পিণ্ডোবাকার্য্যংশ্রাদ্ধাদিকংক্বচিৎ।

৫১॥ এতানিপতিতানান্তুযঃকরোতিবিমোহিতঃ। তপ্ত
কৃচ্ছ্রদ্বয়েনৈবতস্যশুদ্ধির্নচান্যথা।

৫২॥ বিষ্ণুধর্ম্মোত্তরে। স্বাম্যর্থেব্রাহ্মণার্থেবামিত্রকার্য্যেচ
যেমৃতাঃ। গোগ্রহেনিহতাযেচতেনরাস্বর্গগামিনঃ।
ভবিষ্যে। যন্ন্যাসীয়স্ত্রিযামীয়োমৃতঃকুষ্ঠীকদাচন।
যদিস্নেহাদ্ধরেদ্দাহংযতিচান্দ্রায়ণংচরেৎ।

৫৩॥ কৌর্ম্মে। প্রেতীভূতংদ্বিজংবিপ্রোযোঽনুগচ্ছতিকা
মতঃ। স্নাত্বাসচেলংস্পৃষ্ট্বাগ্নিংঘৃতংপ্রাশ্যবিশুদ্ধ্যতি।
একাহাৎক্ষত্রিয়েশুদ্ধির্বৈশ্যেচস্যাদ্দ্ব্যহেনতু। শূদ্রেদিন
ত্রয়ংপ্রোক্তংপ্রাণায়ামশতংপুনঃ।

৫৪॥ কৌর্ম্মে। অবরশ্চেদ্বরংবর্ণমবরম্বাবরোযদি। অ
শৌচেসংস্পৃশেৎস্নেহাত্তদাশৌচেনশুদ্ধ্যতি।

৫৫॥ অসপিণ্ডংদ্বিজংপ্রেতংবিপ্রোনির্হৃত্যবন্ধুবৎ। বিশু
দ্ধ্যতিত্রিরাত্রেণমাতুরাপ্তাংশ্চবান্ধবান্। যদ্যন্নমত্তি
তেষান্তুদশাহেনশুদ্ধ্যতি। অনদন্নন্নমহ্নৈবনচেৎ
তস্মিন্গৃহেবসেৎ।

৫৬ ॥ বিষ্ণুঃ। চিতাধূমসেবনেসর্ব্বেবর্ণাঃস্নানমাচরেয়ুঃ।

৫৭ ॥ পারস্করঃ। অস্থিসঞ্চয়নাদর্ব্বাক্যদিবিপ্রোঃশ্রুপাত

য়েৎ। মৃতেশূদ্রেগৃহংগত্বাত্রিরাত্রেণবিশুদ্ধ্যতি।

৫৮ ॥ মৃতস্যবান্ধবৈঃসার্দ্ধংকৃত্বাতুপরিদেবনম্। বর্জয়েত্ত

দহোরাত্রংদানংস্বাধ্যায়কর্ম্মচ।

৫৯ ॥ অস্থিসঞ্চয়নাদূর্দ্ধমাসংযাবদ্দ্বিজাতয়ঃ। দিবসে

নৈবশুদ্ধ্যন্তিবাসসাংক্ষালনেনচ।

৬০ ॥ স্বজাতের্দিবসেনৈবদ্ব্যহাৎক্ষত্রিয়বৈশ্যয়োঃ। স্পর্শং

বিনানুগমনেশূদ্রোনক্তেনশুদ্ধ্যতি।

৬১ ॥ সম্বর্ত্তঃ। চতুর্থেহনিকর্ত্তব্যমস্থিসঞ্চয়নংদ্বিজৈঃ।

তথা॥ চতুর্থেহনিবিপ্রস্যষষ্ঠেবৈক্ষত্রিয়স্যচ। অষ্টমে

দশমেচৈবস্পর্শঃস্যাৎবৈশ্যশূদ্রয়োঃ। কৌর্ম্মে। সূতকে

তুসপিণ্ডানাং সংস্পর্শোনৈবদুষ্যতি। আদিপুরাণে

সূতকেতুমুখংদৃষ্ট্বাজাতস্যজনকস্ততঃ। কৃত্বাসচেলঃ

স্নানন্তুশুদ্ধোভবতিতৎক্ষণাৎ। অন্যাশ্চমাতরস্তদ্বৎ

তদ্দেহংনস্পৃশন্তিচেৎ। সুমন্তুঃ। মাতুরেবসূতকংতাং

স্পৃশতশ্চপিতুর্নেতরেষাং। আদিপুরাণে। ব্রাহ্মণীক্ষত্রি

য়াবৈশ্যাপ্রসূতাদশভির্দিনৈঃ। গাত্রৈঃশূদ্রাতুসংস্পৃ

শ্যাত্রয়োদশভিরেবচ।

৬২ ॥ অঙ্গিরাঃ । মরণং যদি তুল্যং স্যাৎ মরণেনকথঞ্চন অস্পৃশ্যস্তত্ বেদ গোত্রং সর্ব্বমেব সবান্ধবং ।

৬৩ ॥ জাতমাত্রস্য বালস্য যদি স্যাৎ মরণং পিতুঃ । মাতুশ্চ সূতকং তৎ স্যাৎ পিতা ত্বস্পৃশ্য এবচ ।

৬৪ ॥ দেবলঃ । অশৌচকালাদ্বিজ্ঞেয়ং স্পর্শনন্তু ত্রিভাগতঃ মনুঃ । নির্দ্দশং জ্ঞাতিমরণং শ্রুত্বা পুত্রস্য জন্মচ । সবাসা জলমাপ্লুত্য শুদ্ধো ভবতি তৎক্ষণাৎ ।

৬৫ ॥ ব্যাসঃ । সংস্থিতং পতিমালিঙ্গ্য প্রবিশেদ্ যা হুতাশনং । তস্যাঃ পিণ্ডাদিকং দেয়ং ক্রমশঃ পতি পিণ্ডবৎ ।

৬৬ ॥ ৬৭ ॥ পৈঠীনসিঃ । অস্বতায়াঃ প্রদাতব্যা দশপিণ্ডাস্ত্র্যহেনতু । স্বাম্যশৌচে ব্যতীতেতু তস্যাঃ শ্রাদ্ধং বিধীয়তে । ব্রহ্মপুরাণে । দেশান্তরমৃতে পত্যৌ সাধ্বী তৎপাদুকাদ্বয়ং । নিধায়োরসি সংশুদ্ধা প্রবিশেৎ জাতবেদসং । ঋগ্‌বেদবাদাৎ সাধ্বীস্ত্রী নভবেদাত্মঘাতিনী । ত্র্যহাশৌচে নিবৃত্তেতু শ্রাদ্ধং প্রাপ্নোতি শাস্ত্রবৎ ।

৬৮ ॥ দেবীপুরাণং । প্রমীতো পিতরৌ যস্য দেহস্তস্যাশুচির্ভবেৎ । নাপি দৈবং নবা পৈত্র্যং যাবৎ পূর্ণো নবৎসরঃ । জাবালঃ । সন্ধ্যাং পঞ্চমহাযজ্ঞান্ নৈত্যিকং স্মৃতিকর্ম্মচ । তন্মধ্যে হাপয়েৎ তেষাং দশাহান্তে পুনঃ

ক্রিয়া। বৃহস্পতিঃ। পিতর্য্যপরতে পুত্রো মাতুঃ শ্রাদ্ধানি বর্ত্ততে মাতর্য্যপি চবৃত্তায়াং পিতুঃ শ্রাদ্ধাদৃতে সমাঃ।

৬৯॥ নাভেকর্দ্ধমধোবাপি যদি স্যাদ্‌ব্রিরস্রবঃ। তদ্দিনে বৈদিকং কর্ম্ম কৃত্বা তুনরকং ব্রজেৎ। স্বকুক্কুটবরাহাংশ্চ গ্রাম্যান্‌সংস্পৃশ্য মানবঃ। সচেলং সশিরঃ স্নাত্বা তদানীমেব শুদ্ধ্যতি। দেবলঃ। দন্তলগ্নং সংহার্য্যং লেপং মন্যেত দন্তবৎ। নতত্র বহুশঃ কুর্য্যাৎ যত্নমুদ্ধরণে পুনঃ। ভবেদশৌচমত্যর্থং তৃণবেধাৎ ব্রণে কৃতে।

৭০॥ কৌর্ম্মে। ক্রিয়াহীনস্য মূর্খস্য মহারোগিন এবচ। যথেষ্টাচরণস্যাহুর্মরণান্তমশৌচকং।

৭১॥ পুত্রঃ পৌত্রঃ প্রপৌত্রো বা তদ্বদ্বা ভ্রাতৃসন্ততিঃ। সপিণ্ডসন্ততির্বাপি ক্রিয়ার্হা নৃপ জায়তে। শঙ্খঃ। ভার্য্যাপিণ্ডং পতির্দদ্যাৎ ভর্ত্রে ভার্য্যা তথৈবচ। ব্রহ্মপুরাণং দত্তানাঞ্চাপ্যদত্তানাং কন্যানাং কুরুতে পিতা। চতুর্থেহনি তাস্তেষাং কুর্ব্বীরন্‌সুসমাহিতাঃ। মতামহানাং দৌহিত্রাঃ কুর্ব্বন্ত্যহনি চাপরে। তেপি তেষাং প্রকুর্ব্বন্তি দ্বিতীয়েহনি সর্ব্বদা। ব্রহ্মপুরাণং। ভ্রাতুর্ভ্রাতা স্বয়ং চক্রে তদ্ভার্য্যা চেন্নবিদ্যতে। তস্য ভ্রাতৃসুতশ্চক্রে যস্য নাস্তি সহোদরঃ। পুত্রো ভ্রাতা পিতা বাপি মাতুলো গুরুরেবচেতি

শুচেরেতায়তনং । শঙ্খঃ । শ্বশুরদেশ্চানুষ্মাচৈবতদভাবে সপিণ্ডকঃ । শাতাতপঃ । মাতুলোভাগিনেয়স্যস্বস্রীয়োমাতুলস্যচ । বিষ্ণুপুরাণং এষামভাবেসর্ব্বেষাংসমানোদকসন্ততিঃ । মাতৃপক্ষস্যাপিণ্ডেনসম্বন্ধাযেজলেনরা । ব্রাহ্মে । জামাতুঃশ্বশুরাশ্চক্রেতেষাংতেপিচসংযতাঃ । ভাগিনেয়সুতানাঞ্চসর্ব্বেষাঞ্চাপরেহনি । গোতমঃ । শিষ্যাশ্চদদ্যুস্তদভাবেঋত্বিগাচার্য্যৌ ।মিত্রাণ্যাহুদ্দণ্ডাদানামিতিব্রহ্মপুরাণং । সংঘাতান্তর্গতৈর্ব্বাপিরাজ্ঞাবাধনহারিণঃইতিবিষ্ণুপুরাণং ।

৭২ ॥ সবর্ণাসামেকপত্নীনামেকাচেৎপুত্রিণীভবেৎ । সবর্বাস্তাস্তেনপুত্রেণপ্রাহপুত্রবতীর্মনুঃ । বৃহস্পতিঃ । মাতুঃস্বসামাতুলানীপিতৃব্যস্ত্রীপিতুঃস্বসা । শ্বশ্রূঃপূর্ব্বজপত্নীচমাতৃতুল্যাঃপ্রকীর্ত্তিতাঃ । অনাম্নাতপুরুষক্রিয়াধিকারিপ্রমাণেজ্ঞেয়ংক্রমস্তুভয়ত্রৈব ভাষালিখনদৃষ্ট্যা বেদিতব্যঃ ।

৭৩ ॥ ব্যাধুঃকৃতচূড়স্তুকুর্ব্বীতোদকংপিণ্ডমেবচ । দায়ভাগবৃত্তং । অসংস্কৃতঃসুতঃশ্রেষ্ঠোনাপরোবেদপারগঃ ।

৭৪ ॥ আশ্বলায়নগৃহ্যপরিশিষ্টং অসগোত্রঃসগোত্রোবা

যদিস্ত্রীযদিবাপুমান্। প্রথমেহনিযোদদ্যাৎসদশাহ

সমাপয়েৎ ॥

৭৫॥ লঘুহারীতঃ। সপিণ্ডীকরণাস্তানিযানিশ্রাদ্ধানিষো

ড়শ। পৃথক্‌নৈবসুতাঃকুর্য্যুঃপৃথক্‌দ্রব্যাঅপিক্বচিৎ।

৭৬॥ আশ্বলায়নগৃহ্যপরিশিষ্টং। অগ্নিনাশেপলাশবৃন্তা

নাংত্রীনিষষ্টিশতানিচ। পুরুষপ্রতিকৃতিংকৃত্বাঅশী

ত্যর্দ্ধন্তুশিরসিগ্রীবায়াংদশযোজয়েৎ। উরসিত্রিং

শতংদদ্যাদ্বিংশতিংজঠরেতথা। বাহুভ্যাঞ্চশতং

দদ্যাৎদদ্যাদঙ্গুলিভির্দ্দশ। দ্বাদশার্দ্ধংবৃষণয়োরষ্টার্দ্ধং

শিশ্নএবচ। উরুভ্যাঞ্চশতংদদ্যাত্রিংশতংজানুজ

ঙ্ঘয়োঃ। পাদাঙ্গুলীষুদশএতৎপ্রেতস্যলক্ষণং। উর্ণা

সূত্রেণসংবেষ্ট্যযবপিষ্টেনলেপয়েৎ।

৭৭॥ ত্রিপক্ষাভ্যন্তরেরাজন্নৈবপর্ণনরংদহেৎ। তদূর্দ্ধ

মস্থযীংপ্রাপ্যাদর্শন্যাপিবিচক্ষণঃ।

৭৮॥ আদিপুরাণং। এবংপর্ণনরংদগ্ধাত্রিরাত্রমশুচি

র্ভবেৎ।

৭৯॥ যস্যপার্শ্বঃপুত্রাশ্চেদ্রপলভোরন্তদস্থীনিকদাচন

তদলাভেপলাশস্যাসম্ভবেহিপুনঃক্রিয়া।

৮০॥ আদিপুরাণং। সদ্যঃশৌচেপিদাতব্যাঃসবের্ষাং

যুগপৎতথা। পারস্করঃ। প্রথমেদিবসেদেয়াস্ত্রয়ঃ পিণ্ডাঃসমাহিতৈঃ। দ্বিতীয়েচতুরোদদ্যাদস্থিসঞ্চয়নং তথা। ত্রীন্তুদদ্যাতৃতীয়েহ্নি বস্ত্রাদিক্ষালয়েত্তথা। প্রচেতাঃ। শিশুঃশূদ্রায়দাতব্যোদিনান্যষ্টৌনবাথবা। সম্পূর্ণেতুততোমাসেশিশুশেষংসমাপয়েৎ। আসন্নমৃত্যুনাদেয়াগৌঃসবৎসাচপূর্ব্বৎ। তদভাবেতুগৌরেবনস্কোদ্ধারণায়বৈ। তদাযদিনশক্নোতিদাতুংবৈতরণীঞ্চগাং। শক্তোন্যোঽবক্তদাদত্বাশ্রেয়োদদ্যান্মৃতস্যচ।

৮১॥ অহ্নঃপঞ্চদশোভাগোমুহূর্ত্তঃপরিকীর্ত্তিতঃ। মৎস্যপুরাণং। প্রাতঃকালোমুহূর্ত্তাংস্ত্রীন্সঙ্গবস্তাবদেবতু। মধ্যাহ্নস্ত্রিমুহূর্ত্তঃস্যাদপরাহ্নস্ততঃপরং। সায়াহ্নস্ত্রিমুহূর্ত্তঃস্যাচ্ছ্রাদ্ধংতত্রনকারয়েত্।

৮২॥ ব্রহ্মপুরাণং। পূর্ব্বাহ্নেযাতৃকংশ্রাদ্ধমপরাহ্নেতুপৈতৃকং। একোদ্দিষ্টন্তুমধ্যাহ্নেপ্রাতর্বৃদ্ধিনিমিত্তকং।

৮৩॥ ছন্দোগপরিশিষ্টং। যয়াস্তংসবিতাযাতিপিতরস্তামুপাসতে। তিথিস্তেভ্যোপরাহ্নোহিস্বয়ংদত্তঃস্বয়ম্ভুবা।

৮৪॥ অপরাহ্নেতুসংপ্রাপ্তেঅভিজিদ্রৌহিণোদযে। যদত্রদীয়তেজন্তোস্তদক্ষয়মুদাহৃতং।

৮৫॥ গৌতমঃ। আরভ্যাকুতপে শ্রাদ্ধং কুর্য্যাদারৌহিণং বুধঃ। বিধিজ্ঞোবিধিমাস্থায়রৌহিণন্তুনলঙ্ঘয়েত্।

৮৬॥ বিষ্ণুধর্ম্মোত্তরং। শুক্লপক্ষেতিথির্গ্রাহ্যাযস্যামভ্যুদিতোরবিঃ। কৃষ্ণপক্ষেতিথির্গ্রাহ্যাযস্যামস্তমিতোরবিঃ।

৮৭॥ দেবলঃ। রাহুদর্শনসংক্রান্তিবিবাহাত্যয়বৃদ্ধিষু। স্নানদানাদিকং কুর্য্যুর্নিশিকাম্যব্রতেষুচ।

৮৮॥ কাত্যায়নঃ। যদাচতুর্দ্দশীযামং তুরীয়মনুপূরয়েত্ অমাবস্যাক্ষীয়মাণাতদৈবশ্রাদ্ধমিষ্যতে।

৮৯॥ বর্দ্ধমানামাবস্যালক্ষয়েদপরেহনি। যামাংস্ত্রীনধিকান্বাপিপিতৃযজ্ঞস্ততোভবেত্।

৯০॥ হারীতঃ। ত্রিমুহূর্ত্তাপিকর্ত্তব্যাপূর্ব্বাদর্শাতবহ্বৃচৈঃ। কুহূরব্বর্য্যুভিঃকার্য্যাযথেষ্টং সামগীতিভিঃ।

৯১॥ অশ্বযুক্কৃষ্ণপক্ষেতুশ্রাদ্ধং কুর্য্যাদ্দিনেদিনে। ত্রিভাগহীনং পক্ষং বাত্রিভাগন্ত্বর্দ্ধমেববা। ইত্যশৌচশ্রাদ্ধব্যবস্থাপ্রমাণবচনানি।

অথপ্রায়শ্চিত্তব্যবস্থাপ্রমাণবচনানি।

১॥ শঙ্খলিখিতৌ। বাপ্যকেশনখান্পূর্ব্বং দ্বৃতং প্রাশ্য বহির্নিশি। প্রায়শ্চিত্তমুপাসীনোবাগ্যতস্ত্রিসবনং স্পৃশেত্।

২ ॥ হারীতঃ। রাজাবারাজপুত্রোবাব্রাহ্মণোবাবহুশ্রুতঃ
কেশানাংবপনংকৃত্বাপ্রায়শ্চিত্তংসমাচরেৎ। কেশা
নাংধারণার্থন্তুদ্বিগুণংব্রতমাচরেৎ। দ্বিগুণেতুব্রতে
চীর্ণেদ্বিগুণাদক্ষিণাভবেৎ।

৩ ॥ পরাশরঃ। বিদ্বদ্বিপ্রনৃপস্ত্রীণাংনেষ্যতেকেশমুণ্ডনং।
ঋতেমহাপাতকিনোগাংহন্তুশ্চাবকীর্ণিনঃ।

৪ ॥ ভবদেবভট্টধৃতং। বপনংনৈবনারীণাংনানুব্রজ্যা
জপাদিকং। নগোষ্ঠেশয়নংতাসাংনবাদধ্যাদ্গবা
জিনং।

৫ ॥ পাদেতুনখলোমানাংদ্বিপাদেশ্মশ্রুণোপিচ। ত্রিপা
দেতুশিখাবর্জ্জংসশিখন্তুনিপাতনে।

৬ ॥ শ্রাদ্ধংকুর্য্যাদ্ব্রতস্যান্তেগোহিরণ্যানুদক্ষিণং। বৃহ
স্পতিঃ। গর্ভাধানাদিকার্য্যেষুব্রাহ্মণান্ভোজয়েৎ
দশ। মনুঃ। অবিদ্যমানেসর্ব্বস্বংবেদবিদ্ভ্যোনিবেদ
য়েৎ।

৭ ॥ পরাশরঃ। বিখ্যাপ্যপাপংবক্তৃভ্যঃকিঞ্চিদ্দত্ত্বাব্রতংচ
রেৎ। অঙ্গিরাঃ। ন্যায়তোমার্গমাণস্যক্ষত্রিয়াদেঃ
প্রণামিনঃ। অন্তরাব্রাহ্মণংকৃত্বাব্রতমেতৎসমাদিশেৎ।

৮ ॥ অঙ্গিরাঃ। কৃত্বাপূর্ব্বমুদাহারংযথোক্তংধর্ম্মবক্তৃভিঃ
পশ্চাৎকার্য্যানুসারেণশক্ত্যাকর্ব্বন্ত্বনুগ্রহং। হারীতঃ

তস্মাৎকৃচ্ছ্রযথাণ্যর্দ্ধংপাদংবাপিবিহিনতঃ। জ্ঞাত্বা বলাবলংকালংপ্রায়শ্চিত্তংপ্রকল্পয়েৎ।

৯ ॥ অঙ্গিরাঃ। ঊনৈকাদশবর্ষস্যাপঞ্চবর্ষাধিকস্যচ। চরেদ্‌ গুরুঃসুহৃদ্বাপিপ্রায়শ্চিত্তংবিশুদ্ধয়ে। ততোন্যূনতরস্যা স্যনাপরাধোনপাতকং। নচাস্যরাজদণ্ডোস্তিপ্রায় শ্চিত্তংনবিদ্যতে। লঘুহারীতঃপাদোবালেষুদাতব্যঃ সর্ব্বপাপেষ্বয়ংবিধিঃ। শাতাতপঃ। অশীতির্যস্যবর্ষা নিবালোবাপ্যূনষোড়শঃ। প্রায়শ্চিত্তার্দ্ধমর্হন্তিস্ত্রিয়ো রোগিনএবচ। গোবর্দ্ধবিশ্বামিত্রঃ। স্ত্রীশূদ্রয়োরেব মেতদ্বধৈচৈবনসংশয়ঃ। মনুঃ। খ্যাপনেনানুতাপ নেনতপসাধ্যয়নেনচ। পাপকৃন্মুচ্যতেপাপাত্তথাদানেন চাপদি।

১০ ॥ নাষ্টম্যাংনচতুর্দ্দশ্যাংপ্রায়শ্চিত্তপরীক্ষনে। দেবলঃ। কালাতিরেকেদ্বিগুণংপ্রায়শ্চিত্তংসমাচরেৎ। দ্বিগুণং রাজদণ্ডস্কন্দত্বাশুদ্ধিমবাপ্নুয়াৎ।

১১ ॥ সম্বর্ত্তঃ। প্রাজাপত্যব্রতাশক্তৌধেনুংদদ্যাৎপয়স্বিনীং। ধেনোরভাবেদাতব্যংতুল্যংমূল্যংনসংশয়ঃ। য স্মিন্‌যস্মিন্‌ব্রতেপুরুষস্যযাবান্‌ক্লেশোজায়তেতাবান্‌ ক্লেশোযাবদ্ভিঃ প্রাজাপত্যৈর্ভবতিতস্মিন্‌তস্মিন্‌ ব্রতে তৎসংখ্যকপ্রাজাপত্যৈর্ধেনবঃসঙ্কলিতব্যাঃ। যথাচা

ন্দ্রায়ণেকাপালিকান্নভোক্তৄণাংতন্নারীগামিনান্তথা ।
জ্ঞানাৎকৃচ্ছ্রাব্দযুদ্দিষ্টমজ্ঞানাদৈন্দবদ্বয়ং । অত্রপ্রাজা
পত্যস্যদ্বাদশাহসাধ্যত্বেনমাসেনার্দ্ধপ্রাজাপত্যদ্বয়াৎ
বর্ষেত্রিংশৎপ্রাজাপত্যানি। স্যাত্ত্বকামকৃতেযত্তদ্দ্বিগুণং
বুদ্ধিপূর্ব্বকেইত্যঙ্গিরোবচনাদজ্ঞানেপঞ্চদশপ্রাজাপত্যপ্রা
প্তৌতুল্যক্লেশজনকত্বেনৈন্দবদ্বযংবিহিতংঅর্থাদেকং
সার্দ্ধসপ্তপ্রাজাপত্যতুল্যং ভবতিধেনুদানেতুবিভাগা
সম্ভবাদষ্টৌধেনবোদেয়াঃ ।

১২ ॥ ধেনুঃপঞ্চভিরাঢ্যানাংমধ্যানাংত্রিপুরাণিকী । কার্ষা
পণৈকমূল্যাহিদরিদ্রাণাংপ্রকীর্ত্তিতা ।

১৩ ॥ মনুঃ । গোবধোযাজ্যসংযাজ্যপারদর্য্যাত্মবিক্রয়াঃ ।
গুরুমাতৃপিতৃত্যাগঃস্বাধ্যায়াগ্ন্যোঃসুতস্যচইত্যাদি ।

১৪ ॥ ব্রহ্মহত্যাসুরাপানংস্তেয়ংগুর্ব্বঙ্গনাগমঃ । মহান্তি
পাতকান্যাহুঃসংসর্গশ্চাপিতৈঃসহ ॥ বিষ্ণুঃ । পিতৃ
পিতৃব্যমাতামহমাতুলশ্বশুর নৃপপত্ন্যভিগমনংগুরু
দারগমনসমংপিতৃস্বসৃমাতৃস্বসৃগমনঞ্চশ্রোত্রিয়র্ত্বিগু
পাধ্যায়মিত্রপত্ন্যভি গমনংস্বসৃসখ্যাঃসগোত্রায়াঃউ
ত্তমবর্ণায়াঅন্ত্যজায়াঃকুমার্য্যারজস্বলায়াঃপ্রব্রজিতায়া
নিঃক্ষিপ্তায়াশ্চঅনুপাতকিনস্তেতে মহাপাতকিনো
যথাঅশ্বমেধেনশুদ্ধ্যন্তিতীর্থানুসরণেনবা ।

১৬ ॥ বিষ্ণুঃ। মাতৃগমনং দুহিতৃগমনং স্নুষাগমনঞ্চেত্যতিপাতকানি।

১৭ ॥ মনুঃ। উপপাতকসংযুক্তোগোঘ্নোমাসংযবান্পিবেৎ। কৃতবাপোবসেদ্গোষ্ঠেচর্ম্মণাতেনসংবৃতঃ। চতুর্থকালমশ্নীয়াদক্ষারলবণংমিতং। গোমূত্রেণচরেৎস্নানংদ্বৌমাসৌনিয়তেন্দ্রিয়ঃ। দিবানুগচ্ছেত্তাগাস্তুতিষ্ঠন্নূর্দ্ধংরজঃপিবেৎইত্যাদি।

১৮। বৃষভৈকাদশাগাস্তুদদ্যাৎসুচরিতব্রতঃ। সম্বর্ত্তঃপূর্ণে তুসার্দ্ধমাসেতুসবিপ্রান্ভোজয়েত্ততঃ। ভুক্তবৎসুচবিপ্রেষুগাংবৈদদ্যাৎবিচক্ষণঃ।

১৯ ॥ দেবলঃ। গোঘ্নঃষন্মাসংস্তুচর্ম্মণাপরিবৃতোগোগ্রাসাহারোগোব্রতোযবাশীগোভিরভিসঞ্চরন্ বিমুচ্যেত

২০ ॥ শাতাতপঃপঞ্চগব্যেনগোঘাতীমাসৈকেনবিশুদ্ধ্যতি। গোমতীঞ্চজপেদ্বিদ্যাংগবাংগোষ্ঠেচসংবসেৎ।

২১ ॥ বিশ্বামিত্রঃকৃচ্ছ্রাংস্তুচতুরঃকুর্য্যাদ্গোবধেবুদ্ধিপূর্ব্বকে। অমত্যাতুদ্বয়ংকুর্য্যাত্তদর্দ্ধংবালবৃদ্ধয়োঃ।

২২ ॥ বৃদ্ধযমঃ। পাদমুৎপন্নমাত্রেতুদ্বৌপাদৌগাত্রসম্মিতে পাদোনংকৃচ্ছ্রমাচষ্টেহত্বাগর্ভমচেতনং। অঙ্গপ্রত্যঙ্গসম্পন্নেগর্ভেচেতঃসমন্বিতে। দ্বিগুণংগোব্রতংকার্য্যংপ্রায়শ্চিত্তংবিশুদ্ধয়ে।

২৩॥ সম্বর্ত্তঃ। একাচেদ্বহুভিঃক্বাপিদৈবাদ্ব্যাপাদিতাভবেৎ।
পাদং পাদঞ্চহত্যায়াশ্চরেয়ুস্তেপৃথক্পৃথক্॥

২৪॥ বৃহস্পতিঃ। অতিবৃদ্ধামতিকৃশামতিবালাঞ্চরোগিণীং।
হত্বাপূর্ব্ববিধানেনচরেদর্দ্ধং ব্রতং দ্বিজঃ।

২৫॥ বৃদ্ধপ্রচেতাঃ। একবর্ষেগবিহতেকৃচ্ছ্রপাদোবিধীয়তে।
অবুদ্ধিপূর্ব্বং পুংসঃস্যাদ্দ্বিপাদস্তুদ্বিহায়নে। ত্রিহা
য়নেত্রিপাদঃস্যাৎপ্রাজাপত্যমতঃপরং।

২৬॥ বৃহস্পতিঃ। পাদঞ্চরেদ্রোধবধেদ্বৌপাদৌবন্ধনেচরেৎ।
যোজনে পাদহীনংস্যাৎচরেৎসর্ব্বং নিপাতনে।
তথা। অঙ্গুষ্ঠমাত্রঃস্থৌল্যেনবাহুমাত্রঃপ্রমাণতঃ। আর্দ্র
শ্চসপলাশশ্চদণ্ডইত্যভিধীয়তে। তস্মাদূর্দ্ধ্বপ্রহারেণ
যদিগাংবিনিপাতয়েৎ। দ্বিগুণন্তুভবেত্তত্রপ্রায়শ্চিত্ত
মিতিস্থিতিঃ। হারীতঃ। নাশাচ্ছেদনদাহেষুকর্ণচ্ছেদন
বন্ধনে। অতিদোহাতিবাহাভ্যাংকৃচ্ছ্রচান্দ্রায়ণঞ্চরেৎ।

২৭॥ পরাশরঃ। শীতানিলহতাচৈবওদ্বন্ধনমৃতাপিবা।
শূন্যাগারাদুপেক্ষেয়াং প্রাজাপত্যং বিনির্দ্দিশেৎ।
অপালনাৎপুনশ্চেত্তুগৌশ্চরন্তীকথঞ্চন। জলৌঘম
ল্লেমগ্নানাগবিদ্যুদ্ধতাপিবা। শ্বভ্রেবাপতিতা
কস্মাৎশ্বাপদৈর্বাপিভক্ষিতা। প্রাজাপত্যংচরেৎকৃচ্ছ্রং
গোস্বামীব্রতমুত্তমং। সশিখংবপনংকার্য্যংত্রিস

ন্ধাযবগাহনং । শৃঙ্গৈর্বাপিখুরৈর্যুক্তং লাঙ্গুলশ্রবণা দিভিঃ আর্দ্রযেবহিতঃর্ম্মপরিবীয়মগাং বুজেৎ তাসাংযবোবসেদ্রাত্রৌদিবাতাভিঃসমং বুজেৎ ।

২৮ ॥ অনডুৎসহিতাং গাশ্চদদ্যাদ্বিপ্রায়দক্ষিণাং । মনুঃ । দিবাবক্তব্যতাপালেরাত্রৌস্বামিনিতদ্গৃহে । যোগক্ষেমেঽন্যথাচেত্তুপালোবক্তব্যতামিয়াৎ ।

২৯ ॥ বিষ্ণুঃ । পাদশ্চাপ্রাপ্তঃকদেয়োবৎসেস্বামিনারক্ষিতে

৩০ ॥ সম্বর্ত্তঃ । দেবদ্রোণ্যাংবিহারেচকূপেস্বায়তনেষুচ । এষু গোষুবিপন্নাসু প্রায়শ্চিত্তংনবিদ্যতেঃ ॥ অপালনেতু কৃচ্ছ্রংস্যাৎশূন্যাগারাদ্যুপপ্লবে ॥ নারদঃ ॥ ভ্রাতৃণা মবিভক্তানামেকোধর্ম্মঃপ্রবর্ত্ততে ॥ বিভাগেসতিধর্ম্মো হিভবেত্তেষাংপৃথক্ পৃথক্ ॥

৩১ ॥ বৃহদঙ্গিরাঃ । অরক্ষিতেতুপাদোমৃতেব্যাঘ্রাদিভ ক্ষিতে । বৃতার্দ্ধমাচরেৎস্বামীরক্ষিতেনাস্তিদূষণং ।

৩২ ॥ স্মৃতিঃযদাচরেত্তুবিপিনেনির্ভয়েবৃকবর্জ্জিতে । আগ ত্যাকস্মাত্তুব্যাঘ্রাদ্যৈঃঘাদিতেনাস্তিদূষণং ।

৩৩ ॥ কূপেখাতেচধর্ম্মার্থেগৃহদাহেচযেমৃতাঃ । নগরগ্রাম দাহেচপ্রায়শ্চিত্তংনবিদ্যতে । নারদঃ । রাজগৃহে গৃহীতোবাবজ্রাদিভির্হতোপিবা । অথসর্পেণবাদষ্টো বৃক্ষভঙ্গাৎমৃতোভবেৎ । ব্যাঘ্রাদিভির্হতোবাপিব্যাধি

ভির্বাপ্যুপদ্রুতঃ । নসদোষঃপালকস্যনসদোষোস্তি
গোমতাং ।

৩৪ ॥ সম্বর্ত্তঃ । যন্ত্রণেগোচিকিৎসার্থেমূঢ়গর্ভবিমোচনে ।
যত্নেকৃতেবিপত্তিঃস্যাৎপ্রায়শ্চিত্তংনবিদ্যতে ।

৩৫ ॥ তথাঔষধংস্নেহমাহারংদদদ্গোব্রাহ্মণেষুচ । প্রাণি
নাংপ্রাণবৃত্ত্যর্থংপ্রায়শ্চিত্তংনবিদ্যতে । বিষ্ণুঃপল্ল
লোদ্ধবৃক্ষব্যাঘ্রশ্বাপদাদিনিপাতনেশ্বভ্রোদ্বন্ধন সর্পাদৌ
মৃতেপাদোনমাচরেৎ । অপালনেতুকৃচ্ছ্রংস্যাৎশূন্যা
গারাদ্যুপপ্লবে । সম্বর্ত্তঃব্যাপন্নানাংবহূনান্তুবন্ধনে
রোধনেপিবা । ভিষঙ্মিথ্যোপচারেচদ্বিগুণংগোব্রতং
চরেৎ । একাচেৎবহুভিঃক্বাপিইত্যাদিলিখিতংপ্রাক্ ।
কাশ্যপঃ । দোগ্ধ্রাদিমনাতিদাহান্নাশাপাশদামঘণ্টা
ভরণযোজনাত্তৈলপানৌষধি পানবিনিয়োগাৎব্যাপ
ন্নানাংপ্রায়শ্চিত্তংব্রাহ্মণেভ্যোনিবেদ্যসশিখবপনং
কৃত্বাপ্রাজাপত্যংকৃচ্ছ্রমাচরেৎ । চীর্ণব্রতেগাংব্রাহ্ম
ণায়দদ্যাৎধেনুংতিলধেনুম্বেতি । ব্যাসঃ । ঘণ্টা
ভরণদোষেণবিপত্তির্যদিগোর্ভবেৎ । ব্রতার্দ্ধমাচরেত্তত্র
ভূষণার্থংহিতৎকৃতং । আপস্তম্বঃকান্তারেষ্বথবা
দুর্গেগৃহদাহাবটেষুচ । যদিতত্রবিপত্তিঃস্যাৎপাদএকো
বিধীয়তে ।

৩৬ ॥ সম্বর্ত্তঃ । দাহচ্ছেদশিরাভেদপ্রযত্নৈরুপকুর্ব্বতাং ।
দ্বিজানাং গোহিতার্থং বা প্রায়শ্চিত্তং ন বিদ্যতে । গো
পালকো গবাং গোষ্ঠে যন্ত্রবৃষং ন কারয়েৎ । মক্ষিকা
লীনরক্তে মক্ষিকাভিঃ সভক্ষ্যতে ।

৩৭ ॥ সম্বর্ত্তঃ । শৃঙ্গভঙ্গেঽস্থিভঙ্গে চ কটিভঙ্গে তথৈব চ । যদি
জীবতি ষণ্মাসান্ প্রায়শ্চিত্তং ন বিদ্যতে । পরাশরঃ ।
ধূর্য্যেষু বহমানেষু দণ্ডেনাভিহতেষু চ । কাষ্ঠেন লোষ্ঠু
না বাপি পাষাণেন তু তাড়িতঃ । মূর্চ্ছিতঃ পতিতশ্চৈব
মৃতো বা সহসা এব চ । এবং গতানাং ধূর্য্যাণাং প্রবক্ষ্যামি
যথাবিধি । গুল্ফিতস্তু পদং গচ্ছেৎ পঞ্চসপ্তদশাথবা
গ্রাসং বা যদি গৃহ্ণাতি তোয়ং বাপিবতি স্বয়ং । পূর্ব্ব ব্যা
ধিবিনষ্টানাং প্রায়শ্চিত্তং ন বিদ্যতে । অঙ্গিরাঃ । অনা
ত্রাঙ্কিনলক্ষ্মভ্যাং বাহনির্মোচনে পিবা । সায়ং সংঘ
মনার্থন্তু ন দুষ্যেদ্রোধবন্ধয়োঃ । দেবদ্রোণ্যাং বিহারে
চেতি লিখিতং প্রাক ।

৩৮ ॥ গোভিলঃ । মুষ্কমোষকরো বিপ্রো কৃত্বং চান্দ্রায়ণঞ্চ
রেৎ । প্রযোজকস্তু কুর্ব্বীত ব্রতস্যার্দ্ধং বিশুদ্ধয়ে ।

৩৯ ॥ হলৈর্ব্বা শকটৈর্ব্বাপি যোজয়েদ্যো বৃষং স্বয়ং । প্রাজা
পত্যাদ্বয়ং কুর্য্যাৎ দ্বিগুণং যোষিতাং গবাং । বৃষভন্তু

সমৃৎসৃষ্টংকপিলাংবাপিকামতঃ । যোজয়িত্বাহলে কুর্য্যাৎব্রতংচান্দ্রায়ণদ্বয়ং

৪০ ॥ বিক্রয়ৈর্গাশ্বিনিময়ৈর্দত্ত্বাগোমাংসখাদকে। ব্রতংচান্দ্রায়ণংকুর্য্যাৎবৈশ্যাস্কাদ্বীভবেৎ ।

৪১ ॥ মনুঃ । তুরীয়োব্রহ্মহত্যায়াঃক্ষত্রিয়স্যবধেস্মৃতঃ । বৈশ্যেঽষ্টমাংশোবৃত্তস্থেশূদ্রেজ্ঞেয়স্তুষোড়শঃ । যাজ্ঞবল্ক্যঃ । চান্দ্রায়ণংচরেৎসর্ব্বানবকৃষ্টান্নিহত্যচ । শূদ্রো ঽধিকারহীনোঽপিকালেনানেনশুদ্ধ্যতি । অঙ্গিরাঃ । সর্ব্বান্ত্যজানাংগমনেভোজনেসংপ্রযাপনে । পরাকেনবিশুদ্ধিঃস্যাদিত্যাঙ্গিরসভাষিতং । হারীতঃ । ষড্বর্ষাণিরাজন্যোত্রীনিবর্ষানিবৈশ্যেএকঃশূদ্রেক্ষত্রিয়বৎ ব্রাহ্মণীষুবৈশ্যবৎক্ষত্রিয়াসুশূদ্রবদিতরাসু ।

৪২ ॥ যাজ্ঞবল্ক্যঃবিপ্রদুষ্টাংস্ত্রিয়ংহত্বাশূদ্রহত্যাব্রতংচরেৎ । তথাযাগস্থক্ষত্রবিট্ঘাতেব্রহ্মহত্যাব্রতংচরেৎ । গর্ভহাচযথাবর্ণংতথাত্রেয়ীনিসূদনঃ । হারীতঃ। বৃথাপশুঘাতেপ্রাজাপত্যং।

৪৩ ॥ আক্রোশিতস্তাড়িতোবাবৈর্ব্বাপরিপীড়িতঃ । যমুদ্দিশ্যত্যজেৎপ্রাণান্তমাহুর্ব্রহ্মঘাতকং। বৃহস্পতিঃ। আক্রুষ্টস্তুযদাক্রোশংস্তাড়িতঃপ্রতিতাড়য়ন । হত্বাততায়িনঞ্চৈবনাপরাধীভবেন্নরঃ। ভবিষ্যোপুত্রঃশিষ্যস্তথা

ভার্য্যাশাসনতশ্চেদ্বিনশ্যতি। নশাস্তাতত্রদোষেণলিপ্য
তেদেষমনুস্তম। বশিষ্ঠঃ। অগ্নিদোগরদশ্চৈবশস্ত্রপাণি
র্ধনাপহা। ক্ষেত্রদারাপহারীচষড়েতেআততায়িনঃ।
আততায়িনিচোৎকৃষ্টেতপঃস্বাধ্যায়জন্মতঃ। বধ
স্তত্রতুনৈবস্যাৎপাপেহীনেবধোভৃগুঃ। ভবিষ্যেক্ষিপ্বা
নমপিগোবিপ্রংনহন্যাদ্বৈকদাচন। কাত্যায়নঃ। নিবৃ
ত্তানাংযদারম্ভাদ্গ্রহণংনববীৎস্মৃতঃ। জন্মনাব্রাহ্ম
ণোজ্ঞেয়ঃসংস্কারৈর্দ্বিজউচ্যতে। বিদ্যয়াযাতিবিপ্রত্ব
শ্রোত্রিয়স্ত্রিভিরুচ্যতে। কালিকাপুরাণে। ইয়ংবিশুদ্ধি
রুদিতাপ্রমাপ্যাকামতোদ্বিজং। কামতোব্রাহ্মণ
বধেজীবতোনাস্তিনিষ্কৃতিঃ। যমঃ। ব্রাহ্মণক্ষত্রিয়
বিশাংশূদ্রাণাঞ্চরিতব্রতঃ। দদ্যাদ্যথানুপূর্ব্বেণযথা
শক্ত্যাচদক্ষিণাং। গোসহস্রংসহস্রার্দ্ধংশতঞ্চদশ
বৈতথা। বৃষভশ্চৈবদাতব্যোবর্গাণাংপ্রবরস্তুযঃ।
ভবিষ্যেপরিষদ্বিবীনমুক্তেদযুক্তমাঙ্গিরসেনতু। দ্বিগুণা
ক্ষত্রিয়াণান্তুবৈশ্যানাংত্রিগুণাস্মৃতা। চতুর্গুণাতুশূদ্রা
ণাংপরিষদুক্তামহাত্মনা। পরিষদ্ব্রতংপ্রোক্তংশুদ্ধ
য়েপাপকর্ম্মাণাং। জাতিমাত্রেহতেবিপ্রেকামতোযদ্ব
ব্রেণু। চরেদ্দ্বাদশবর্ষাণিকৃত্বাশবশিরোধ্বজং। সুমন্তঃ:
ব্রহ্মহাবৎসরংকৃচ্ছ্রংচরেৎপূর্ণেতুবৎসরে। হিরণ্য

মণিগোবৃষান্নতিলভূমিসর্পীংষিব্রাহ্মণেভ্যোদদ্যাৎ।
ভবিষ্যোত্তিরস্কৃতো যদাবিপ্রোনির্গুণোম্রিয়তেঽনঘ।
সনিমিত্তংযদাবিপ্রস্তদেদংশুদ্ধয়েচরেত্। ত্রৈবার্ষিকং
ব্রহ্মচর্য্যংকৃত্বাশুদ্ধ্যেতবিপ্রহা। আপস্তম্বঃনাস্যাস্মিন্
লোকেপ্রত্যাসত্তির্বিদ্যতেকল্মষন্তুনিহন্যতে। ভবিষ্যে
একোকালংযদাহন্যাত্যুগপত্সুরসত্তম। নিমিত্তমেক
মাশ্রিত্যাহেতিনৈকেনবামিতৌ ইত্যুপক্রম্যঅকামতো
যদাহন্যাদ্ব্রাহ্মণান্যানবোগুহ। চরেত্তদাবনেঘোরে
যাবত্প্রাণপরিক্ষয়ং। কামতস্তুযদাহন্যাদ্ব্রাহ্মণান্
সুরসত্তম। তদাত্মানংদহেদগ্নৌবিধিনায়েনতচ্ছৃণু
ইত্যাদি। তথাসম্বন্ধেনবিনাদেবশুশ্রূষাদেনকোপিতঃ।
কেশশ্মশ্রুনখাদীনাংকৃত্বাবৈবপনংগুহ। ব্রহ্মচর্য্যং
চরেদ্বীরবর্ষেণৈকেনশুদ্ধ্যতি। যাজ্ঞবল্ক্যঃ। চরেদ্ব্রত
মহত্বাপিঘাতার্থঞ্চেত্সমাগতঃ। যমঃজলাগ্ন্যুদ্বন্ধন
ভ্রষ্টাঃপ্রব্রজ্যাঽনশনচ্যুতাঃ। বিষপ্রপতনপ্রায়ঃশস্ত্র
ঘাতচ্যুতাশ্চযে। সর্ব্বেতেপ্রত্যবসিতাঃসর্ব্বধর্ম্মবহি
ষ্কৃতাঃ। চান্দ্রায়ণেনশুদ্ধ্যেয়ুস্তপ্তকৃচ্ছ্রদ্বয়েনবা।
৪৪॥ মনুঃ। গৌড়ীপৈষ্টীচমাধ্বীচবিজ্ঞেয়াত্রিবিধাসুরা। যথৈ
বৈকাতথাসর্ব্বানপাতব্যাদ্বিজোত্তমৈঃ। যাজ্ঞবল্ক্যঃ।
কামাদপিহিরাজন্যোবৈশ্যোবাপিকথঞ্চন। মদ্যমেবা

সুরাংপীত্বানদোষংপ্রতিপদ্যতে। মনুঃ। সুরাংপীত্বা দ্বিজোমোহাদগ্নিবর্ণাংসুরাংপিবেত্। তয়াসকায়ে নির্দ্দগ্ধেমুচ্যতেকিল্বিষাত্ততঃ। গোমূত্রমগ্নিবর্ণংবাপি বেদুদকমেববা। পয়োঘৃতংবামরণাদ্গোশকৃদ্রসমেব বা॥ যমঃ অজানন্বারুণীংপীত্বাপ্রাশ্যমূত্রপুরীষয়োঃ। পুনঃসংস্কারমর্হন্তিত্রয়োবর্ণাদ্বিজাতয়ঃ।

৪৫॥ বিষ্ণুঃ। কুনখীশ্যাবদন্তশ্চদ্বাদশরাত্রংকৃচ্ছ্রঞ্চরিত্বা ওদ্ধারয়েযাতাংতদ্দন্তনখাবিতি।

৪৬॥ মনুঃ। সুবর্ণস্তেয়কৃদ্বিপ্রোরাজানমভিগম্যতু। স্বকর্ম খ্যাপয়নব্রুয়ান্মাংভবাননুশাস্ত্বিতি। গৃহীত্বামুষলং রাজাসকৃদ্ধন্যাত্তুতংস্বয়ং। বধেনশুদ্ধ্যতিস্তেনো ব্রাহ্মণস্তপসৈববা। তবিষ্যেতপঃকর্ত্তুমশক্তশ্চেদ্দণ্ডে নৈববিশুদ্ধ্যতি। তথায়দাচনির্গুণঃস্বামীক্ষত্রিয়োবৈ শ্যত্রববা। হর্ত্তাচব্রাহ্মণোবীরতদাপস্তম্বভাষিতং। ব্যাসঃ। এতদেবব্রতংস্তেনঃপাদন্যূনংসমাচরেৎ। ষট্ত্রিংশন্মাতংসুবর্ণাদল্পহরণে বৎসরঃপরিকীর্ত্তিতঃ

৪৭॥ প্রচেতাঃশূদ্রস্যব্রাহ্মণীং মোহাদ্গজতঃশুদ্ধির্মহতঃ। পূর্ণমেবব্রতংদেয়ংমাতাযস্মাদ্দ্বিতস্যাসা। মনুঃ। গুরুতল্পোভিভাষ্যৈনস্তপ্তেসুপ্যাদয়োময়ে। শূর্মীং জ্বলন্তীংবাশ্লিষ্যেন্মৃত্যুনাসবিশুদ্ধ্যতি। যমঃ। যষ্ট্বা

শীতীররাসাবাশ্মশ্নগোবিপিনেবনেপ্রাজাপত্যংচরেৎ কৃচ্ছ্রমবদমেকংসমাহিতঃ। বিষ্ণুঃ। অতিপাতকিন ন্মেতেষ্প্রবিশেয়ুর্হুতাশনং। মহান্যানিস্কৃতিস্তেষাং বিদ্যতেহিকথঞ্চন। গমনংকৃত্বেতানুবৃত্তৌযমঃ। দ্বেপ রভার্য্যাসুত্রীনিশ্রোত্রিয়পত্নীষু। শঙ্খলিখিতৌঅন্যাথ বৈশ্যায়াযবকীর্ণঃসম্বৎসরং ত্রিসবনমনুতিষ্ঠেৎক্ষত্রি য়ায়াংদ্বেবর্ষেব্রাহ্মণ্যাংত্রীনিবৈশ্যাবচ্চদ্রায়াং। বৌ ধায়নঃপুংসাংব্রাহ্মণাদীনাংসংবৎসরংব্রহ্মচর্য্যাং শূদ্রংকটাগ্নিনাদহেত।

৪৮॥ বৃহস্পতেস্তাঃআনুলোম্যেনবিহিতংকৃচ্ছ্রংপাদাবরো পিতং। মনুঃ। বিপ্রদুষ্টাংস্ত্রিয়ংভর্ত্তানিরুদ্ধ্যাদেক বেশ্মনি। যত্‌পুংসঃপরদারেষুতচ্চৈনংচারয়েদ্‌ব্রতং। ঋষ্যশৃঙ্গঃ। অন্তর্বত্নীচযুবতিঃকামিতাযানাযোনিনা প্রায়শ্চিত্তংনবৈকুর্য্যাদ্‌যাবদ্গর্ভোননিঃসৃতঃ।

৪৯॥ যমঃ। এতৈরগম্যাগমনৈঃসদ্যঃপততিবৈদ্বিজঃ। তথাস্কন্দতিবৈমোহাত্‌গুরুতল্পেনযুজ্যতে। শিশ্নস্যোত্‌ কর্ত্তনংকৃত্বাপ্রাণত্যাগাদ্বিশুদ্ধ্যতি। মনুঃ। চণ্ডালান্ত্য স্ত্রিয়োগত্বাভুক্ত্বাচপ্রতিগৃহ্যচ। পতত্যজ্ঞানতোবিপ্রো জ্ঞানাত্‌সাম্যন্তুগচ্ছতি। সম্বর্ত্তঃনটীংশৈলূষিকীঞ্চৈব রজকীংবেণুজীবিনীং। গত্বাগান্দ্রায়ণংকুর্য্যাত্‌তথা

চর্ম্মোপজীবিনীং । এতদজ্ঞাতঃ । যমঃ । রজকশ্চর্ম্ম
কারশ্চনটোবরুড়এবচ । কৈবর্ত্তমেদভিল্লাশ্চসপ্তৈতে
হন্ত্যজাঃস্মৃতাঃ । এতেষাঞ্চস্ত্রিয়োদত্বাভুক্ত্বাচপ্রতিগৃ
হ্যচ । পততাজ্ঞানতোবিপ্রোজ্ঞানাত্সাম্যন্তুগচ্ছতি ।
অঙ্গিরাঃ । চতস্রস্তুপরিত্যাজ্যাঃশিষ্যগাগুরুগাতথা ।
পতিঘ্নীচবিশেষেনজুঙ্গিতোপহতাচযা ।

৫০॥ হীনবর্ণোপভুক্তাযাত্যাজ্যাবধ্যাপিবাভবেত্ । স্কন্দপু
রাণং । ব্রহ্মঘ্নেচসুরাপেচচৌরেচগুরুতল্পগে । নিষ্কৃ
তির্বিহিতাসদ্ভিঃকৃতঘ্নেনাস্তিনিষ্কৃতিঃ । ভর্তৃপিণ্ডাপহ
র্ত্তাচপিতৃপিণ্ডাপহারকঃ । যস্মাদ্গৃহীত্বাবিদ্যাঞ্চদক্ষিণাং
নপ্রয়চ্ছতি । পুত্রান্স্ত্রিয়শ্চযোদ্বেষ্টিযশ্চতান্ঘাতয়েন্নরঃ
কৃতস্যাদোষংবদতিসকার্য্যান্নকরোতিযঃ । নস্মরেত্তু
কৃতংযস্তুআশ্রয়ান্যশ্চদূষয়েত্ । সর্ব্বাংস্তান্নৃষি
ভিঃসার্দ্ধংকৃতঘ্নান্মনুরব্রবীত্ ।

৫১॥ মনুঃ । মত্তক্রুদ্ধাতুরাণাঞ্চনভুঞ্জীতকদাচন । তথাগবা
চান্নমুপঘ্রাতংদুষ্টান্নঞ্চবিশেষতঃ । গণান্নংগণিকা
ন্নঞ্চবিদুষাচজুগুপ্সিতং । স্তেনগায়নয়োশ্চান্নংতক্ষো
র্ব্বার্দ্ধুষিকস্যচ । দীক্ষিতস্যকদর্য্যস্যবদ্ধস্যনিগড়স্যচ ।
অভিশস্তস্যষণ্ডস্যপুংশ্চল্যাদাম্ভিকস্যচ । তথাচিকিত
সকস্যামৃগয়োঃক্রূরস্যোচ্ছিষ্টভোজিনঃ । উগ্রান্নংসূতি

কান্নঞ্চপর্য্যাচান্তমনির্দশং । অনর্চ্চিতংবৃথামাংস
মবীরায়াশ্চযোষিতঃ । দ্বিষদন্নংনগর্য্যান্নংপতিতান্ন
মবক্ষুতং । পিশুনানৃতিনোশ্চান্নংক্রতুবিক্রয়িণস্তথা ।
শৈলূষতুন্নবায়ান্নংকৃতঘ্নস্যান্নমেবচ । কর্ম্মারস্যনিষা
দস্যরঙ্গাবতারকস্যচ । সুবর্ণকর্ত্তুর্বেণস্যশস্ত্রবিক্রয়িন
স্তথা । শ্ববতাংশৌণ্ডিকানাঞ্চচেলনির্ণেজকস্যচ । রঞ্জ
কস্যনৃশংসস্যযস্যচোপপতির্গৃহে । তথাযএতেনো
হ্বভোজ্যান্নাঃক্রমশঃপরিকীর্ত্তিতাঃ । তেষাংত্বগাস্থিরো
মানিবদন্ত্যন্নংমনীষিণঃ। ভুক্ত্বাতোন্যতমস্যান্নমমত্যা
ক্ষপনংত্র্যহং । মত্যাভুক্ত্বাচরেত্কৃচ্ছ্রংরেতোবিন্মূত্র
মেবচ । হারীতঃ। চাক্রিকলৌহকারতক্ষকান্নভোজনে
ত্রিরাত্রমুপবসেত্ । অত্রসকৃদভ্যাসসঙ্গুণনির্গুণদেশ
কালাদিভেদেনচান্দ্রায়ন তপ্তকৃচ্ছ্রসপ্তরাত্রপ্রভৃতিব্র
তানিজ্ঞেয়ানি ।

৫১ ॥ অঙ্গিরাঃ । অন্ত্যাবশায়িনামন্নমশ্নীযাদ্‌য়স্তুকামতঃ ।
সতুচান্দ্রায়ণংকুর্য্যাত্তপ্তকৃচ্ছ্রমথাপিবা । চণ্ডালঃশ্বপচঃ
ক্ষত্তাসূতোবৈদেহিকস্তথা। মাগধায়োগবৌচৈবসপ্তৈ
তেঽন্ত্যাবশায়িনঃ । বিষ্ণুঃ । বিপ্রেতুসকলংদেয়ং
পাদোনংক্ষত্রিয়েমতং । বৈশ্যেঽর্দ্ধংপাদশেষন্তুশূদ্র
জাতিষুশস্যতে । তথাচণ্ডালান্নংভুক্ত্বাত্রিরাত্রমুপব

সেৎসিদ্ধং ভুক্ত্বা পরাকঃ । শঙ্খঃ । অমেধ্যপতিত
চণ্ডালপুক্কশরজস্বলাবধূতকুষ্ঠিকুনখিকুলনখিনামন্নানি
ভুক্ত্বা কৃচ্ছ্রমাচরেৎ ।

৫৩॥ আপস্তম্বঃ । রজকে চৈব শৈলূষে বেণুচর্ম্মোপজীবিনি ।
এতেষাং যস্তু ভুঞ্জীত দ্বিজশ্চান্দ্রায়ণং চরেৎ

৫৪॥ এতেষামস্থিয়োগাত্ত্বা ভুক্ত্বা চ প্রতিগৃহ্য চ । পততাজ্ঞান
তো বিপ্রো জ্ঞানাৎ সম্যক্ত্বগচ্ছতি । মনুঃ । ভুক্ত্বাতোন্য
তমস্যান্নমমত্যা ক্ষপণং ত্র্যহং । মত্যা ভুক্ত্বাচরেৎ কৃ
চ্ছ্রং রেতোবিণ্মূত্রমেব চ । সঙ্করাপাত্রকৃত্যাসু মাসং
শোধনমৈন্দবং তথানাদ্যাৎ শূদ্রস্যাপক্বান্নং বিদ্বান
শ্রাদ্ধিনো দ্বিজঃ । আদদীতামমেবাস্মাদবৃত্তাবেকরাত্রি
কং । যেন তস্য ভুক্তং পক্বান্নং কৃপার্ত্তং তস্মান্নির্দ্দিশেৎ ।
শূদ্রান্নভোজিনঃ পাদ ইত্যাহ ভগবান্ যমঃ । দেবলঃ ।
স্বদাসো নাপিতো গোপঃ কুম্ভকারঃ কৃষীবলঃ । ব্রাহ্মণৈ
রপি ভোজ্যান্নাঃ পঞ্চৈতে শূদ্রযোনয়ঃ । হারীতঃ । কন্দু
পক্বং স্নেহপক্বং পায়সং দধিশক্তবঃ । এতানি শূদ্রান্ন
ভুজো ভোজ্যানি মনুরব্রবীৎ । শঙ্খঃ । চণ্ডালান্নং ভূমি
পালমন্নং জীবিশস্ত্রজীবিনাং । শৌণ্ডিকান্নং সূতিকান্নং
ভুক্ত্বা মাসং ব্রতী ভবেৎ । বিষ্ণুঃ । চণ্ডালান্নং ভুক্ত্বা

ত্রিরাত্রমুপবসেৎস্নিগ্ধং ভুক্ত্বাপরান্নঃ। অঙ্গিরাঃ। যস্তু
চণ্ডালসংস্পৃষ্টং পিবেৎকিঞ্চিদকামতঃ। সতুসান্তপনং
কৃচ্ছ্রং চরেৎশুদ্ধ্যর্থমাত্মনঃ।

৫৫॥ সম্বর্ত্তঃ। শ্বকাকগোভিরুচ্ছিষ্টভক্ষণেতুদিনদ্বয়ং।
জাবালঃ। কেশকীটাবপন্নঞ্চস্ত্রীভিঃস্পৃষ্টং তথৈবচ।
শ্বোদক্যাশূদ্রসংস্পৃষ্টং পঞ্চগব্যেনশুদ্ধ্যতি। সুমন্তুঃ।
গোমাংসভক্ষণেপ্রাজাপত্যং চরেৎ। গ্রাম্যকুক্কুট
নরগোমাংসভক্ষণেনসর্ব্বেষ্বেবদ্বিজানাং প্রায়শ্চিত্তা
ন্তেভূয়ঃসংস্কারংকুর্য্যাৎ। বৃহস্পতিঃ। অলেহ্যানামপে
য়ানামভক্ষ্যাণাঞ্চভক্ষণে। রেতোমূত্রপুরীষাণাংশুদ্ধৌ
চান্দ্রায়ণং চরেৎ। যাজ্ঞবল্ক্যঃ। অজ্ঞানাত্তুসুরাং পীত্বা
রেতোবিণ্মূত্রমেবচ। পুনঃসংস্কারমর্হন্তিত্রয়োবর্ণাদ্বি
জাতয়ঃ। লঘুবিষ্ণুঃ। মৃদ্বারিকুসুমাদীংশ্চফলকন্দেক্ষু
মূলকান্। বিণ্মূত্রদূষিতান্প্রাশ্যচরেৎকৃচ্ছ্রঞ্চপাদতঃ।
সন্নিকৃষ্টেঽর্দ্ধমেবস্যাৎকৃচ্ছ্রস্যাত্রবিশোধনং। ব্যাসঃ
সংসর্গদুষ্টং যচ্চান্যং ক্রিয়াদুষ্টঞ্চকামতঃ। ভুক্ত্বাস্ব
ভাবদুষ্টঞ্চতপ্তকৃচ্ছ্রং সমাচরেৎ। প্রচেতাঃমৃল্লোষ্ট্র
ভোজনেঽহোরাত্রমভোজনাচ্ছুদ্ধিঃ। মনুঃএকাকী
মিষ্টমশ্নাতিবর্জ্জয়িত্বাসুহৃৎসুতান্। ইত্যুপক্রম্য। লা
লাপনরকেঘোরেদুর্গন্ধেপাত্যতেনরঃ। যাজ্ঞবল্ক্যঃ।

দেবতান্নং হবিঃশিগ্রুলোহিতান্ বৃশ্চনাংস্তথাইত্যা
দ্যভিধায়মৎস্যাংশ্চকামতোজগ্ধ্বাসোপবাসস্ত্র্যহং
বসেৎ। জাবালঃ। কেশকীটাবপন্নঞ্চস্মভিস্পৃষ্টং
তথৈবচ। শ্বোদক্যাশূদ্রসংস্পৃষ্টং পঞ্চগব্যেনশুদ্ধ্যতি।
ব্রাহ্মে। জুষ্টস্যাকেশকীটাক্তং মৃদ্ভস্মকনকাম্বুভিঃ
শুদ্ধ্যদ্যাৎশকৃল্লেশংপ্লুষ্টতং বুষ্টমেবচ। বিষ্ণুঃ। যব
গোধূমজং পয়োবিকারং স্নেহাক্তং শুক্রং ত্রাভবং বজ্জ
য়িত্বাপর্য্যুষিতং প্রাশ্যোপবসেৎ তথাদধিবর্জ্জংকেব
লানিশুক্তানিচ। শুক্তঞ্চঅত্যম্লং শুক্তমাথ্যাতংনিন্দি
তং ব্রহ্মবাদিভিরিতিবৃহস্পত্যুক্তং।

৫১॥ শঙ্খঃ। বাগ্দুষ্টং ভাবদুষ্টঞ্চভাজনেভাবদূষিতে।
ভুক্ত্বান্নং ব্রাহ্মণঃপশ্চাৎত্রিরাত্রন্তুব্রতীভবেৎ। পরা
শরঃ। ভিন্নভাণ্ডেচভুঞ্জানোযস্ত্বানেনদ্বিজোত্তমঃ।
সুবর্ণোদকসংস্পৃষ্টঘৃতং প্রাশ্যবিশুদ্ধ্যতি। সম্বর্ত্তঃ।
শূদ্রাণাংভাজনেভুক্ত্বাভুক্ত্বাবাভিন্নভাণ্ডকে। অহো
রাত্রোষিতোভূত্বাপঞ্চগব্যেনশুদ্ধ্যতি। মনুঃ। অনি
র্দ্দশঞ্চপ্রেতান্নমতুষ্টিকরমেবচইত্যাদ্যভিধায় ভুক্ত্বা
তোন্যতমস্যান্নমমত্যাক্ষপণং ত্র্যহং। মত্যাভুক্ত্বা
চরেৎকৃচ্ছং রেতোবিণ্মূত্রমেবচ। ব্রহ্মপুরাণং একেন
পাণিনাদত্তংশূদ্রাদত্তংনভক্ষয়েৎ। ঘৃতংতৈলঞ্চ

লবণংপানীয়ংপায়সংতথা । বশিষ্ঠঃপূর্ব্বোন্নতু
হস্তেননাদ্যেনকদাচন । যমঃ । যাবকংফাণিতং
শাকংক্ষীরসংলবণংঘৃতং । হস্তদত্তানিভুক্ত্বাতু
ভোক্তাসান্তপনংচরেৎ । সম্বর্ত্তঃঅনাচান্তঃপিবেদ্‌যস্তু
ভক্ষয়েদ্বাপিকিঞ্চন । গায়ত্র্যষ্টসহস্রন্তুজপংকৃত্বাবিশু
দ্ধ্যতি । আচামেৎচর্ব্বণেনিত্যংভাত্বাতাম্বূলচর্ব্ব
ণং । বিনাযজ্ঞোপবীতেনভুঙ্‌ক্তেচেদ্ব্রাহ্মণোযদি । স্নানং
কৃত্বাজপংকৃত্বাউপবাসেনশুদ্ধ্যতি । মার্কণ্ডেয়পুরাণং
দেবতাতিথিভৃত্যেষুভ্রতেষুযাগতেষুচ । অভুক্তবৎ
সুযেশ্নন্তিতদ্বৎপিত্রগ্নিপক্ষিষু । দুষ্টান্নপূয়নির্য্যাসভুজঃ
শূচীমুখাস্তুতে । আপস্তম্বঃভুঞ্জানস্যতুবিপ্রস্যকদাচিৎ
স্রবতেগুদং । উচ্ছিষ্টস্যশুচিত্বঞ্চপ্রায়শ্চিত্তংকথং
ভবেৎ । আদৌকৃত্বাতুশৌচংবৈততঃপশ্চাদুপস্পৃশেৎ
অহোরাত্রোষিতোভূত্বাপঞ্চগব্যেনশুধ্যতি । ব্রহ্মপু
রাণংরেতোমূত্র পুরীষাণামুৎসর্গশ্চেৎপ্রয়াদতঃ ।
তদাদৌতুপ্রকর্ত্তব্যাতেনশুদ্ধির্মৃদম্বুভিঃ । পশ্চাদাচম্যতু
জলেজপ্তব্যাঅঘমর্ষণং । শাতাতপঃমূত্রোচ্চারসমুৎ
সর্গেমোহাদ্ভুঙ্‌ক্তেযথবাপিবেৎ । ত্রিরাত্রংতত্রকুর্ব্বীত
ইতিশাতাতপোহব্রবীৎ ।

৫৭ ॥ বৃদ্ধশাতাতপঃযদাভোজনকালেতুঅশুচির্ভবতিদ্বিজঃ

ত্রয়োনিষ্কৃষ্যাত্তং গ্রামং স্নাত্বাবিপ্রোবিশুদ্ধ্যতি। ভক্ষ
য়িত্বাতুতং গ্রামমহোরাত্রেণশুদ্ধ্যতি। অশিত্বাসবর্ব
যেবান্নং ত্রিরাত্রেণবিশুদ্ধ্যতি। মধুং পর্ন্নেদ্বিতং স্নানে
ভুঞ্জীতাথপিবেত্তথা। গায়ত্র্যষ্টসহস্রন্তুজপেৎ স্নাত্বাস
মাহিতঃ। বিষ্ণুঃ। অভোজ্যানামপেয়ানামভক্ষ্যাণা
ঞ্চভক্ষণে। কৃচ্ছ্রপাদং বিশুদ্ধ্যর্থং চরেযুঃক্ষিপ্রশোবিনং
শঙ্খলিখিতৌব্রাহ্মণোচ্ছিষ্টভোজনে মহাব্যাহৃতিভি
র্গায়ত্র্যাপঃপিবেৎ। মনুঃ। বিড়ালকাকাখূচ্ছিষ্টংজ
গ্ধাশ্বনকুলস্য। কেশকীটাবপন্নঞ্চপিবেদ্ব্রহ্মসুবর্চ্চলাং।
শঙ্খঃদূষিতং কেশকীটৈশ্চমার্জ্জারমূষিকৈস্তথা। মক্ষি
কামসকৈশ্চৈবত্রিরাত্রন্তুব্রতংচরেৎ। বিষ্ণুঃ। গো
ভিরুচ্ছিষ্টাশনেদিনমেকমুপোষিতঃপঞ্চগব্যংপিবেৎ।
সম্বর্ত্তঃ। শ্বকাকগোভিরুচ্ছিষ্টভোজনেতুদিনত্রয়ং।
৫৮॥ অঙ্গিরাঃ। যস্তুপংক্তিষুভুঞ্জীতকুৎসিতাসুবিশেষতঃ
অহোরাত্রোষিতোভূত্বাপঞ্চগব্যেনশুদ্ধ্যতি। বিষ্ণুপুরা
ণং। বৈশ্যপংক্ত্যামেকরাত্রং শূদ্রপংক্ত্যাং ত্র্যহঞ্চ
রেৎ। শঙ্খঃ। একপংক্ত্যুপবিষ্টানাং বিপ্রাণাং সহ
ভোজনে। যদ্যেকোপিত্যজেৎপাত্রং শেষমন্নং বিব
র্জ্জয়েৎ। মোহাদ্ভুঞ্জীতযঃপংক্ত্যামুচ্ছিষ্টংসহভোজ
নং। প্রায়শ্চিত্তং চরেদ্বিপ্রঃকৃচ্ছ্রং সান্তপনংতথা।

তথা। পীতাবশেষিতং পীত্বাপানীয়ং ব্রাহ্মণঃ ক্বচিৎ।
ত্রিরাত্রন্তুব্রতংকুর্য্যাদ্বামহস্তেনবাপুনঃ।

৫৯॥ স্মৃতিঃ কালেনবোদকং শুদ্ধং নপাতব্যস্ততগ্রাহং। অকালেতুদশাহংস্যাৎ পীত্বানাদ্যাদহর্নিশং। বৃহন্ন পুরাণং। নবধাতজলংগাবোমহিষ্যশ্চাগযোনয়। শুদ্ধ্যন্তিদিবসৈরেবদশভির্নাত্রসংশয়ঃ। আপস্তম্বঃ। পিত্রোর্জ্জ্যেষ্ঠস্যচভ্রাতুরুচ্ছিষ্টংভোজ্যং।

৬০॥ বিষ্ণুঃ। নিন্দিতেভ্যোবিনাদানংবাণিজ্যংকুষীদজীবনংঅসত্যভাষণং শূদ্রসেবনমিত্যপাত্রীকরণংকৃত্বা তপ্তকৃচ্ছ্রেণশুদ্ধ্যতি। মনুঃ। সঙ্করাপাত্রকৃত্যাসু মাসংশোধনমৈন্দবং। মলিনীকরণীয়েষুতপ্তঃস্যাদ্যাবকৈস্ত্র্যহং। বৌধায়নঃ। চণ্ডালদর্শনেজ্যোতিষাংদর্শনংসম্ভাষণেব্রাহ্মণসম্ভাষণং উচ্ছিষ্টদর্শনেএকরাত্রমুপবাসঃসম্ভাষণেত্রিরাত্রং সংস্পর্শেত্রিরাত্রংসহগমনেসচেলস্নানং। মার্কণ্ডেয়পুরাণং। সূর্য্যেন্দুতারকাদৃষ্টাঃযৈরুচ্ছিষ্টৈশ্চকামতঃ। তেষাংঘামৈর্ন্নরৈরক্লিন্নাস্তোবহ্নিঃসমিষ্যতে। প্রায়শ্চিত্তস্নাতকব্রতলোপেচপ্রায়শ্চিত্তমভোজনমিতিমনুক্তং। আপস্তম্বঃ। তৈলাভ্যক্তস্তথাবান্তঃশ্মশ্রুকর্ম্মণিমৈথুনে। মূত্রোৎসারংযদাকুর্য্যাদহোরাত্রেণশুদ্ধ্যতি। অঙ্গিরাঃ। দন্তোৎস্তো।

র্বিপ্রয়োরগ্নোর্গুরুশিষ্যদ্বিজাতিষু । অন্তরং যদি গচ্ছেত্তু
বিপ্রশ্চান্দ্রায়ণং চরেৎ । মনুঃ । স্নাতকব্রতলোপেচ
প্রায়শ্চিত্তমভোজনং । পাদপ্রতাপনং কৃত্বা কৃত্বা বহ্নিং
তথাপ্যধঃ । কুশৈঃ প্রমার্জ্জ্য পাদৌ চ দিনমেকং ব্রতী ভ
বেৎ । প্রাজাপত্যেন চৈকেন সর্ব্বপাপক্ষয়োভবেৎ ।
ক্ষুত্বা নিষ্ঠীব্য বাসস্তু পরিধায়াচমেদ্বুধঃ । শাতাতপঃ ।
বাতকর্ম্মনি নিষ্ঠীবে দন্তাশ্লিষ্টে তথানৃতে । ক্ষুতে পতিত
সম্ভাষে দক্ষিণশ্রবণং স্পৃশেৎ । শাম্বপুরাণং । লোভা
ম্মোহাৎ প্রমাদাত্বা ব্রতভঙ্গো যদা ভবেৎ । উপবাস
ত্রয়ং কুর্য্যাৎ কুর্য্যাদ্বা কেশমুণ্ডনং । প্রায়শ্চিত্তমিদং
কৃত্বা পুনরেব ব্রতী ভবেৎ । শঙ্খঃ । দিবাতু মৈথুনং কৃত্বা
নগ্নঃ স্নাত্বা তথাম্ভসি । নগ্নাং পরস্ত্রিয়ং দৃষ্ট্বা দিনমেকং
ব্রতী ভবেৎ । মনুঃ । বেদোদিতানাং নিত্যানাং কর্ম্মনাং
সমতিক্রমে । স্নাতকব্রতলোপে চ প্রায়শ্চিত্তমভোজনং
শাতাতপঃ চাণ্ডালপতিতৈঃ স্পৃষ্টো বিণ্মূত্রে চ কৃতে নরঃ ।
ত্রিরাত্রং তত্র কুর্ব্বীত ভুক্ত্বোচ্ছিষ্টঃ ষড়াচরেৎ । আপ
স্তম্বঃ । ভুক্তোচ্ছিষ্টস্ত্বনাচান্তশ্চাণ্ডালৈঃ শ্বপচেন বা প্রমা
দাত্স্পর্শনং গচ্ছেত্ তত্র কুর্য্যাদ্বিশোধনং । গায়ত্র্যষ্ট
সহস্রন্তু দ্রুপদাং বা শতং জপেত্ । ত্রিরাত্রোপোষিতো
ভূত্বা পঞ্চগব্যেন শুদ্ধ্যতি । ৬১ । যমঃ । ক্রোধান্মোহা

ম্বদন্‌ভার্য্যাং মাতরং ভগিনীমপি। প্রাজাপত্যংব্রতং
কুর্য্যাত্‌সর্ব্ববর্ণেষ্বয়ং বিধি। [illegible]

৬২॥ যাজ্ঞবল্ক্যো। ক্রোধাদ্‌যদিত্যজেদ্ভার্য্যাং বয়স্থাংগুণান্বি
তাং। ঋষিচান্দ্রায়ণং কৃত্বাপুনস্তং গৃহমাচরেত্।

৬৩॥ আপস্তম্বঃ। ব্রাহ্মণেনযদাদৈবাত্‌ছিন্নং যজ্ঞোপবী
তকং। মনস্তাপেনশুদ্ধিঃস্যাদাপস্তম্বোঽব্রবীন্মুনিঃ।
প্রাণায়ামত্রয়ং কৃত্বানিরাহারঃক্ষিপেদ্দিনং। [illegible]

৬৪॥ বৃহস্পতিঃ। শূদ্রেণতুযদাচ্ছিন্নমুপবীতং দ্বিজন্মনঃ।
দণ্ডং ত্রিংশত্পণং দত্বাপ্রাজাপত্যেনশুদ্ধ্যতি। বৃহ
স্পতিঃ। উপবীতংব্রাহ্মণস্যচ্ছিন্নং শূদ্রেণকামতঃ। অন্য
দাদায়মন্ত্রেণজপন্নুপবসেদ্দিনং। [illegible]

৬৫॥ ঋষ্যশৃঙ্গঃ। চণ্ডালৈঃশ্বপচৈর্বাপিছিন্নংযজ্ঞোপবীতকং।
মুনিভিস্তুবিনির্দিষ্টং মহাসান্তপনদ্বয়ং। [illegible]

৬৬॥ অলেহ্যানামপেয়ানামভক্ষ্যানাঞ্চভক্ষণে [illegible]রেতো
মূত্রপুরীষাণাং শুদ্ধ্যৈচান্দ্রায়ণং চরেত্। গৌতমঃতপ্ত
কৃচ্ছ্রস্ততঃসংস্কারঃমূত্রপুরীষরেতসাং ভক্ষণেচৈবমিতি।

৬৭॥ সম্বর্ত্তঃ। বিপ্রমূত্রভক্ষণেবিপ্রঃপ্রাজাপত্যং সমাচরেত্।

৬৮॥ আপস্তম্বঃ। ভুক্তোচ্ছিষ্টস্তুনাচান্তঃশ্চণ্ডালৈঃশ্বপচে
নবা। প্রমাদাত্‌স্পর্শনং গচ্ছেত্‌তত্রকুর্য্যাদ্বিশোধনং।
গায়ত্র্যষ্টসহস্রন্তুদ্রুপদাং বাশতং জপেত্। ত্রিরাত্রো

গোষ্বিতোদ্বৃত্তাপঞ্চগব্যেনশুদ্ধ্যতি ॥ ভুক্তোচ্ছিষ্টো
হত্যাতৈঃস্পৃষ্টঃপ্রাজাপত্যংসমাচরেৎ।

৬৯॥ কাশ্যপঃশ্বশূকরান্ত্যচাণ্ডালমদ্যভাণ্ডরজস্বলাঃ। যদ্যু
চ্ছিষ্টঃস্পৃশেত্তত্রকৃচ্ছ্রংসান্তপনংচরেৎ।

৭০॥ ব্রহ্মপুরাণং। উচ্ছিষ্টেনতুশূদ্রেণবিপ্রঃস্পৃষ্টস্তুতাদৃশঃ।
উপবাসেনশুদ্ধঃস্যাচ্ছুনাসংস্পৃষ্টএবচ। উচ্ছিষ্টেনতু
বিপ্রেণবিপ্রঃস্পৃষ্টস্তুতাদৃশঃ। উভৌস্নানংপ্রকুর্ব্বতঃসদ্য
এবসমাহিতৌ।

৭২॥ কাশ্যপঃরজস্বলাতুসংস্পৃষ্টাব্রাহ্মণ্যাব্রাহ্মণীযদি।
একরাত্রংনিরাহারাপঞ্চগব্যেনশুদ্ধ্যতি। রজস্বলাতু
সংস্পৃষ্টারাজন্যাব্রাহ্মণীযদি। ত্রিরাত্রেণবিশুদ্ধিঃস্যা
দ্ব্যাসস্যবচনংযথা। রজস্বলাতুসংস্পৃষ্টাবৈশ্যয়া
ব্রাহ্মণীচযা। পঞ্চরাত্রংনিরাহারাপঞ্চগব্যেনশুদ্ধ্য
তি। রজস্বলাতুসংস্পৃষ্টাশূদ্রায়াব্রাহ্মণীচযা। ষড়্রা
ত্রেণবিশুদ্ধ্যেত্তুব্রাহ্মণীকামচারতঃ।

৭৩॥ বৃহস্পতিঃ। পতিতান্ত্যশ্বপাকেনসংস্পৃষ্টাস্ত্রীরজস্বলা
তান্যহানিব্যতিক্রম্যপ্রায়শ্চিত্তংসমাচরেৎ। প্রথমে
হ্নিত্রিরাত্রন্তুদ্বিতীয়েদ্ব্যহমাচরেৎ। অহোরাত্রং
তৃতীয়েহ্নিচতুর্থেনক্তমাচরেৎ।

৭৪॥ শাতাতপঃ। রজস্বলেতুযেনার্য্যাবনোঃন্যংস্পৃশতো যদি। সবর্ণেপঞ্চগব্যঞ্চবৃহ্মকূর্চ্চমতঃপরং।

৭৫॥ ব্রাহ্মে। সুবর্ণরূপ্যশঙ্খাশ্মশুক্তিরত্নময়ানিচ। কাংস্যায়স্তাম্ররৈত্যানিত্রপুসীসময়ানিচ। নির্লেপানিবিশুদ্ধ্যন্তিকেবলেনজলেনচ। শূদ্রোচ্ছিষ্টানিশুধ্যন্তিত্রিধাক্ষারাম্লবারিভিঃ। সূতিকাশববিণ্মূত্ররজস্বলাহতানিচ। প্রক্ষেপ্তব্যানিতান্যগ্নৌযঃযাবৎসহেদিতি।

৭৬॥ ভারতে। পঞ্চলোচ্ছিষ্টকাংস্যংযৎগবাঘ্রাতমথাপিবা। পতুষোচ্ছিষ্টমপিবাবিশুদ্ধ্যেদ্দশভির্দিনৈঃ।

৭৭॥ ভিন্নকাংস্যেতুযোঃশ্নীয়াৎদদ্যাংগত্বাজপন্দ্বিজঃ। গায়ত্র্যষ্টসহস্রন্তুএকভক্তস্ততঃশুচিঃ।

৭৮॥ বিষ্ণুঃ। শারীরৈর্মলৈঃসুরাভির্মদ্যৈর্বাযদুপহতং তদত্যন্তোপহতং। অত্যন্তোপহতংসর্ব্বংলৌহ ভাণ্ডমগ্নৌপ্রতপ্তংশুদ্ধ্যেতমনিময়মশ্মময়মব্জময়ঞ্চসপ্ত রাত্রংমহীখননেনশৃঙ্গদন্তাস্থিময়ঞ্চতক্ষণেনদারুময়ং মৃন্ময়ংজহ্যাৎ।

৭৯॥ যমঃ। আমমাংসংঘৃতংক্ষৌদ্রংস্নেহাশ্চফলসম্ভবাঃ। ম্লেচ্ছভাণ্ডস্থিতাদুষ্যানিষ্ক্রান্তাঃশুচয়ঃস্মৃতাঃ।

৮০॥ মক্ষিকাসন্ততাধারাভূমিস্তোয়ংহুতাশনঃ। মার্জ্জারশ্চাপিদর্ব্বীচমারুতশ্চসদাশুচিঃ।

৮১॥ ব্রহ্মপুরাণং। সকর্দ্দমং সকুণপং তেভ্যস্তোয়ং যদা স্যাৎ। প্রক্ষিপেৎ পঞ্চগব্যঞ্চ সমন্ত্রং সর্ব্বশুদ্ধিকৃৎ। অপাম্যাকুণপং তেভ্যো বহুতোয়েভ্য এব বা। শতং ঘটান্ যবা ত্রিংশৎ তোয়কুম্ভান্ সমুদ্ধরেৎ। পঞ্চগব্যং ততস্তেষু প্রক্ষিপেন্মন্ত্রপূর্ব্বকং।

৮২॥ দেবলঃ। দহনং খননং ভূমেরুপলেপনবাপনে। পর্য্যন্যবর্ষণঞ্চাপি শৌচং পঞ্চবিধং স্মৃতং। প্রসূতে গর্ভিণী যত্র ম্রিয়তে যত্র মানুষঃ। চণ্ডালৈরুষিতং যত্র যত্র বিন্যস্যতে শবঃ। ইত্যাদি।

৮৩॥ মরীচিঃ লবণে মধুমাংসে চ পুষ্পমূলফলেষু চ। শাককাষ্ঠতৃণেম্বপ্সু দধিসর্পিঃপয়ঃসু চ। তৈলৌষধ্যজিনে চৈব পক্বাপক্বে স্বয়ং গ্রহে। পণ্যেষু চৈব সর্ব্বেষু নাশৌচং মৃতসূতকে।

৮৪॥ নারদঃ। অথ সূতকিনঃ পূজাং বক্ষ্যাগমচোদিতাং। স্নাত্বা নিত্যঞ্চ নির্ব্বর্ত্ত্য মানস্যা ক্রিয়য়া তু বৈ। বাহ্যপূজাক্রমেণৈব ধ্যানযোগেন পূজয়েৎ। যদা কাম্যং ন চেৎ কাম্যং নিত্যং পূর্ব্ববদাচরেৎ।

৮৫॥ জাবালঃ। সন্ধ্যাং পঞ্চমহাযজ্ঞান্ নৈত্যিকং স্মৃতিকর্ম্ম চ। তন্মধ্যে হাপয়েত্তেষাং দশাহান্তে পুনঃ ক্রিয়া।

সমাপ্তঃ।

পৃষ্ঠ	পংক্তি	অশুদ্ধ	শুদ্ধ
২	১১	স্বপিতার	স্বস্বপিতার
৫	২	বাপীগাভ	বাপীগাত
[illegible]	৬	ষষ্ঠি	ষষ্ঠি
৭	[illegible]	ভাগনাই	ভাগহয়
১৫	২	তিনদিবস	একদিবস
২১	[illegible]	পূর্ব্বার্দ্ধে	পূর্ব্বার্দ্ধে
•	০	পূর্বার্দ্ধে	পরার্দ্ধে
•	৪	পূর্ব্বাশৌচে	পরাশৌচে
৩৭	•	সান্তপন	মহাসান্তপন
৪৫	১০	গর্ত্ত	গার্ত্ত
৪৯	১৩	হয়	হয়না
৫৭	[illegible]	বংশবিকার	বংশবিকার
৬২	১৪	ষট্কার্ষাপন	এককার্ষাপন
০	১৭	ত্রিরাত্র	একরাত্র
[illegible]	৮	শত	সহস্র
৬৩	৩	অঙ্কেরত্রুটি	২৯
•	৭	২৯	•